श्री गदाधर स्तोत्रं (वराह पुराणे)

श्री गदाधर स्तोत्रं (वराह पुराणे)

रैभ्य उवाच |
गदाधरं विबुधजनैरभिष्टुतं
धृतक्षमं क्षुधितजनार्तिनाशनं |
शिवं विशालाऽसुरसैन्यमर्दनं
नमाम्यहं हृतसकलाऽशुभं स्मृतौ || 1 ||

पुराणपूर्वं पुरुषं पुरुष्टुतं
पुरातनं विमलमलं नृणां गतिं |
त्रिविक्रमं हृतधरणिं बलोर्जितं
गदाधरं रहसि नमामि केशवं || 2 ||

विशुद्धभावं विभवैरुपावृतं
श्रिया वृतं विगतमलं विचक्षणं |
क्षितीश्वरैरपगतकिल्बिषैः स्तुतं
गदाधरं प्रणमति यः सुखं वसेत् || 3 ||

सुराऽसुरैरर्चितपादपंकजं
केयूरहारांगदमौळिधारिणं |
अब्धौ शयानं च रथांगपाणिनं
गदाधरं प्रणमति यः सुखं वसेत् || 4 ||

सितं कृते त्रेतयुगेऽरुणं विभुं
तथा तृतीये नीलवर्णमच्युतं |
कलौ युगेऽलिप्रतिमं महेश्वरं
गदाधरं प्रणमति यः सुखं वसेत् || 5 ||

बीजोद्भवो यः सृजते चतुर्मुखं
तथैव नारायणरूपतो जगत् |
प्रपालयेद्रुद्रवपुस्तथांतकृ-
-द्गदाधरो जयतु षडर्धमूर्तिमान् || 6 ||

सत्त्वं रजश्चैव तमो गुणास्त्रय-
-स्त्वेतेषु विश्वस्य समुद्भवः किल |
स चैक एव त्रिविधो गदाधरो
दधातु धैर्यं मम धर्ममोक्षयोः || 7 ||

संसारतोयार्णवदुःखतंतुभि-
-र्वियोगनक्रक्रमणैः सुभीषणैः |
मज्जंतमुच्चैः सुतरां महाप्लवो
गदाधरो मामुदधौ तु योऽतरत् || 8 ||

स्वयं त्रिमूर्तिः खमिवात्मनात्मनि
स्वशक्तितश्चांडमिदं ससर्ज ह |
तस्मिन् जलोत्थासनमाप तैजसं
ससर्ज यस्तं प्रणतोऽस्मि भूधरं || 9 ||

मत्स्यादिनामानि जगत्सु प्रश्नुते
सुरादिसंरक्षणतो वृषाकपिः |
मुखस्वरूपेण स संततो विभु-
-र्गदाधरो मे विदधातु सद्गतिं || 10 ||

इति श्रीवराहपुराणे सप्तमोऽध्याये रैभ्य कृत श्री गदाधर स्तोत्रं ||